# Narayanishrikrita Purushottama Stuti

# નારાયણીશ્રીકૃતા પુરુષોત્તમસ્તુતિઃ

## Document Information

Text title : Narayanishrikrita Purushottama Stuti

File name : nArAyaNIshrIkRRitApuruShottamastutiH.itx

Category : vishhnu, vishnu, lakShmInArAyaNIyasaMhitA, stuti

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : lakShmInArAyaNIyasaMhitA | khaNDa 3 | adhyAya 1/1-50||

Latest update : February 28, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 28, 2026

*sanskritdocuments.org*

# નારાયણીશ્રીકૃતા પુરુષોત્તમસ્તુતિઃ

શ્રીનારાયણીશ્રીરુવાચ ।

ૐ નમઃ શ્રીપરબ્રહ્માઽક્ષરાતીતાય ચક્રિણે ।
પરેશાય ધ્વજશૂલધનુશ્ચિહ્નાય શાર્ઙ્ગિણે ॥ ૧॥

સર્વકાન્તાય કાન્તાય સર્વાન્તર્યામિણે નમઃ ।
મુક્તબન્ધાય હૃદ્યાય નમઃ સર્વાવતારિણે ॥ ૨॥

યસ્માત્ સર્વમિદં જાતં યેન પુષ્ટિં પ્રયાતિ ચ ।
યત્ર સ્થિતં ભવેદન્તે તસ્મૈ કાન્તાય તે નમઃ ॥ ૩॥

યસ્માત્ સર્વે હ્યવતારાઃ શ્રીકૃષ્ણાદ્યા ભવન્ત્યપિ ।
કાલો માયા યદંશાશ્ચ તસ્મૈ કાન્તાય તે નમઃ ॥ ૪॥

યાઽહ વૈ સુખદા લક્ષ્મીઃ વિશ્વેશ્વરસુતા તવ ।
પ્રિયા ભૂત્વાઽભવં નારાયણીશ્રીસ્તે નમો નમઃ ॥ ૫॥

અનન્તાઃ કન્યકા જાતા નારાયણ્યો હરેઃ પ્રિયાઃ ।
અનાદિશ્રીકૃષ્ણનારાયણાય તે નમો નમઃ ॥ ૬॥

લક્ષ્મીકાન્તાય કાન્તાય રાધાકાન્તાય તે નમઃ ।
માણિક્યાવાહિને રમાપતયે તે નમો નમઃ ॥ ૭॥

શ્રીશાયતે પદ્માવતીપતયે ચ નમો નમઃ ।
બ્રહ્મપ્રિયાશનાદ્યાનાં પતયે તે નમો નમઃ ॥ ૮॥

ષષ્ઠી યા મનસા દેવી તદ્ધવાય ચ તે નમઃ ।
દીપાવલીનાં પતયે તલાજાપતયે નમઃ ॥ ૯॥

કામધેનુપ્રગોપાયાઽઽર્જન્તીનાં પતયે નમઃ ।
ક્રોધનેશાય ચ ધરાપુત્રીણાં પતયે નમઃ ॥ ૧.૧૦॥

સૂચીકાન્તાય ચ વનદેવીજેશાય તે નમઃ ।

દામનીપતયે કઙ્કુતાલિકેશાય તે નમઃ ॥ ૧૧॥

પિતૃકન્યાપ્રકાન્તાય જનપિતૃસુતેશિને ।
પિતૃદાસીશ્વરાયાઽપિ બાલકૃષ્ણાય તે નમઃ ॥ ૧૨॥

રાસાતલીનાં કાન્તાય વાસન્તિકેશ તે નમઃ ।
સાલમાલીયનારીણામીશ્વરાય ચ તે નમઃ ॥ ૧૩॥

સ્વસ્તિકીનાગકન્યાનાં પતયે તે નમો નમઃ ।
નાગિનીનાં ચ પતયે પરમેશાય તે નમઃ ॥ ૧૪॥

શાવદીનીપ્રકાન્તાય પરેશાય ચ તે નમઃ ।
ઐન્દ્રજાલિકકાન્તાનાં પતયે તે નમો નમઃ ॥ ૧૫॥

વિદ્યાનાથાય ચ સરસ્વતીશાય ચ તે નમઃ ।
લાક્ષ્મણીશાય દેવાય નાડિકેશાય તે નમઃ ॥ ૧૬॥

ગાન્ધર્વીણાં ચ પતયે જુમ્મસેમ્લીશ તે નમઃ ।
સાન્તપનીવરાયાઽપિ સૌરતીપતયે નમઃ ॥ ૧૭॥

મહાબાલેશ્વરીશાય ચૈલબીલેશ તે નમઃ ।
દાક્ષજાવઙ્ગરીશાય ચૌષ્ણીશાય ચ તે નમઃ ॥ ૧૮॥

પ્રાચીનીનાં પતયે તે પિશઙ્ગીપતયે નમઃ ।
સાન્તાણરીશ્વર કૃષ્ણ શૈબીનાં પતયે નમઃ ॥ ૧૯॥

થાર્કૂટસ્થીપ્રમદેશ વીરજારીશ તે નમઃ ।
શાક્ત્યક્ષીપ્રમદાનાથ પિશાચીશ્વર તે નમઃ ॥ ૧.૨૦॥

કાલિમાશીશ્વર કૃષ્ણ દીનબન્ધો ચ તે નમઃ ।
ઔરલકૈતવીશાય ક્રાથકીપતયે નમઃ ॥ ૨૧॥

પૃથુપુત્રીસ્વામિને તે ચોષ્ટ્રાલીપતયે નમઃ ।
હાઙ્કારીસ્વામિને જયકાષ્ઠજેશાય તે નમઃ ॥ ૨૨॥

તીરાણીપતયે નાથ ચાલ્વીનારીશ તે નમઃ ।
જીનવર્દ્ધિસુતેશાયાઽનાથાનાથાય તે નમઃ ॥ ૨૩॥

પ્રકીર્ણપ્રમદેશાય પરમેશાય તે નમઃ ।
આલ્પકૈતવીકાન્તાય પારીશાનીશ તે નમઃ ॥ ૨૪॥

ઇન્દુરાયસુતેશાય મુદ્રાણ્ડીપતયે નમઃ ।
ગણ્ડભૂપસુતેશાય લીનોર્ણાપતયે નમઃ ॥ ૨૫॥

બાર્હચ્છારીસ્વામિને તે બાલલીનીશ તે નમઃ ।
વારસિંહીસ્વામિને તે રાયગામીશ તે નમઃ ॥ ૨૬॥

ફૈનતાન્તવીકાન્તાય સ્તોકહોમીશ તે નમઃ ।
કાશ્યાનીસ્વામિને તે કોલકીપતયે નમઃ ॥ ૨૭॥

દૈનમાનીસ્વામિને તે મમ કાન્તાય તે નમઃ ।
પરેશાય નમો રાયકિન્નટીપતયે નમઃ ॥ ૨૮॥

રાયકોટીસ્વરીશાય નમસ્તે પરમાત્મને ।
રાયરણજિત્પુત્રીશ નમસ્તે હરયે નમઃ ॥ ૨૯॥

રાયવાકક્ષિકેશાય રાયમારીશકેશિને ।
રાયબાલેશ્વરીશાય રાયલમ્બારિકેશિને ॥ ૧.૩૦॥

નમસ્તે રાયનવારિકેશ શ્રીપરમાત્મને ।
રાયહૂણ્ડેશિકેશાય રાયકૂપેશિકેશિને ॥ ૩૧॥

કાલીમણ્ડીસ્વામિને તે વનજેલેશિકેશિને ।
પારાવારપિબીશાય કોટિશેશાય તે નમઃ ॥ ૩૨॥

સતીશીશાય દેવાય ત્રેતાકર્કશિકેશિને ।
આણ્ડજરાસ્વામિને તે બાલ્યરાજસીસ્વામિને ॥ ૩૩॥

રાયસોમનીસ્વામિને તે સર્વેશાય નમો નમઃ ।
ઉરુગવાક્ષિકેશાય પરાઙ્વ્રતનિકેશિને ॥ ૩૪॥

રાયસ્વસ્રીશ તે કૃષ્ણનારાયણ પ્રભો નમઃ ।
ઐશાનપાનીશ કાન્ત રાજારાયીશ તે નમઃ ॥ ૩૫॥

મઙ્ગલાદિપ્રકાન્તાય ચાજનાભીશ્વરાય ચ ।
નમઃ કૌબેરિકેશાય માહેન્દ્રીપતયે નમઃ ॥ ૩૬॥

યમીનાં સ્વામિને કૃષ્ણ વાયવીશાય તે નમઃ ।
વૈશ્વકર્મીસ્વામિને તે વાર્ક્ષીણાં પતયે નમઃ ॥ ૩૭॥

રૌદ્રીણાં પતયે વહ્નિપુત્રીણાં પતયે નમઃ ।
શ્રાવણીનાં ચ પતયે ખાનિજીશાય તે નમઃ ॥ ૩૮॥

સાંવત્સરીસ્વામિને તે ગોપીનાં પતયે નમઃ ।
પ્રાચીનીનાં સ્વામિને તે પિશઙ્ગીસ્વામિને નમઃ ॥ ૩૯॥

રાશિયાનીશ્વર રોમાયનીશ્વર ચ તે નમઃ ।
પારશીપતયે કૃષ્ણ ધીવરીપતયે નમઃ ॥ ૧.૪૦॥

કિન્નરીપતયે કૃષ્ણાઽમરીણાં પતયે નમઃ ।
ગૌરીણાં પતયે પરીપતયે તે નમો નમઃ ॥ ૪૧॥

આબ્રિક્તીસ્વામિને હારિતીશાય તે નમો નમઃ ।
પાતાલીપતયે સ્વર્ગીપતયે તે નમો નમઃ ॥ ૪૨॥

અપ્સરસાં દિનેશાય બ્રહ્મસરોઽધિશાસિને ।
ગાન્ધર્વીણાં પતયે તે કુશલેશાય તે નમઃ ॥ ૪૩॥

વિદ્યુન્મણિસ્વામિને તે ભૌમીનાં પતયે નમઃ ।
દાનવીનાં પતયે તે શક્તીનાં પતયે નમઃ ॥ ૪૪॥

કાશિકાકન્યાકાનાથ ધેનુપાલીશ તે નમઃ ।
કાન્તાકાન્તેશ સર્વેશ મમ પ્રાણેશ તે નમઃ ॥ ૪૫॥

નમઃ શ્રીકમ્ભરાપુત્ર સન્તુષ્ટાઽનુજ તે નમઃ ।
ત્વયા વ્યાપ્તમિદં સર્વં સર્વાન્તર્યામિણે નમઃ ॥ ૪૬॥

શ્રીકૃષ્ણાય વિષ્ણવે સ્વામિને મત્પતયે નમઃ ।
લક્ષ્મીશેશસ્ત્વમેવર્ષિસત્તમસ્ત્વં નૃપોત્તમઃ ॥ ૪૭॥

ત્વં યજ્ઞસ્ત્વં જાઠરશ્ચ તૃપ્તિદસ્ત્વં પરેશ્વર ।
પ્રાપ્ય ત્વાં ત્વર્બુદાદ્યાશ્ચ નાર્યો મુક્તિં ગતાસ્ત્વિહ ॥ ૪૮॥

મુક્તાશ્ચ મુક્તિમાપન્ના નરા જાતાઃ પરાર્ધગાઃ ।
ત્વાં ભજિત્વા સ્વઃ પ્રયાન્તિ જનં સત્યં પ્રયાન્તિ ચ ॥ ૪૯॥

ત્વાં ભજિત્વા ચ વૈકુણ્ઠં વૈરાજક્ષ્માં પ્રયાન્તિ ચ ।
ત્વાં ભજિત્વાઽમૃતલોકં ગોલોકં ચ પ્રયાન્તિ વૈ ।
અક્ષરં પરમં ધામ ત્વાં ભજિત્વા પ્રયાન્તિ હિ ॥ ૧.૫૦॥

ઇતિ શ્રીલક્ષ્મીનારાયણીયસંહિતાયાઃ દ્વાપરયુગસન્તાનાત્મકસ્ય તૃતીયખણ્ડે
પ્રથમાધ્યાયાન્તર્ગતં નારાયણીશ્રીકૃતા પુરુષોત્તમસ્તુતિઃ ।

લક્ષ્મીનારાયણીયસંહિતા । ખણ્ડ ૩। અધ્યાય ૧/૧-૫૦॥

lakShmInArAyaNIyasaMhitA . khaNDa 3. adhyAya 1/1-50..

Proofread by PSA Easwaran

---

*Narayanishrikrita Purushottama Stuti*

pdf was typeset on February 28, 2026

Please send corrections to *sanskrit@cheerful.com*